[८५९] यकपूर्वाया धात्वन्तप्रतिषेधः। (म. भा. ३. ३२६)

धात्वन्तयोः यकारककारयोरस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः। सुनयिका। सुशयिका। सुपाकिका। अशोकिका॥

## भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि। (४७/४६६)

एषाम् आतः स्थाने योऽकारस्तस्य इत्वं न भवति उदीचामाचार्याणां मतेन। भस्त्रा – भस्त्रका, भस्त्रिका। अभस्त्रका, अभस्त्रिका। एषा – एषका, एषिका। अजा – अजका, अजिका। अनजका, अनजिका। ज्ञा – ज्ञका ज्ञिका। अज्ञका, अज्ञिका। द्वा – द्वके, द्विके। स्वा – स्वका, स्विका। अस्वका, अस्विका।

एषाद्वे नञ्पूर्वे न प्रयोजयतः। किं कारणम्? तत्र हि सति यदि साकच्काभ्यां नञ्समासः, अथापि कृते [2]नञ्समासे पश्चादकच्, उभयथापि समासाद् या विभक्तिरुत्पद्यते तस्यां सत्यां त्यदाद्यत्वे सति टापा भवितव्यम्, सोऽन्तर्वर्तिन्या विभक्त्या सुबन्तात् परः इति इत्वस्य प्राप्तिरेव नास्ति। तेन अनेषका, अद्वके इत्येव नित्यं भवितव्यम्। स्वशब्दस्तु ज्ञातिधनाख्यायां नञ्पूर्वोऽपि प्रयोजयति। भस्त्रा इत्ययम् अभाषितपुंस्कः, तस्य 'अभाषितपुंस्काच्च' (७. ३. ४८/४६७) इत्येव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थम्। अविद्यमाना भस्त्रा यस्याः अभस्त्रा। साल्पा अभस्त्रका, अभस्त्रिका। अत्र उपसर्जनह्रस्वत्वे कृते पुनर्बहुव्रीहौ कृते भाषितपुंस्काद् यः टाप् उत्पद्यते तस्य 'केऽणः' (७. ४. १३/८३४) इति यो ह्रस्वः, नासौ अभाषितपुंस्काद् [3]विहितस्य अतः स्थाने भवति। नञ्पूर्वाणामपि इत्यपिशब्दाद् अन्यपूर्वाणां केवलानां च विधिरयमिष्यते। निर्भस्त्रका, निर्भस्त्रिका, बहुभस्त्रका, बहुभस्त्रिका, इत्येवमनयोरपि इष्यते। अत्र नञ्पूर्वाणाम् इति वचनमनुवाद एव [4]मन्दबुद्धिप्रतिपत्त्यर्थः॥

## अभाषितपुंस्काच्च। (४८/४६७)

[5]अभाषितपुंस्काद् [6]विहितस्य आतः स्थाने योऽकारः तस्य उदीचामाचार्याणां मतेन इकारादेशो न भवति। खट्वका, खट्विका[7]। अखट्वका, अखट्विका। परमखट्वका, परमखट्विका। बहुव्रीहौ यदा कपि [8]ह्रस्वः क्रियते तदा भवितव्यमनेन [9]विधिना। अत्रापि अभाषितपुंस्काद् विहितस्यातः स्थाने भवत्यकारः[10] इति। यदा तु अविद्यमाना खट्वा अस्याः अखट्वा, अल्पा अखट्वा अखट्विका इति तदा न भवति। तथा अतिक्रान्ता खट्वाम् अतिखट्वा, अल्पा अतिखट्वा अतिखट्विका॥

## आदाचार्याणाम्। (४९/४६८)

अभाषितपुंस्कात् आतः स्थाने योऽकारः तस्य आचार्याणाम्[11] आकारादेशो भवति। खट्वाका[12]। अखट्वाका। परमखट्वाका[13]॥

---

1. भस्त्रा एषा अजा ज्ञा द्वा स्वा इत्येतेषां नञ्पूर्वाणामनञ्पूर्वाणामपि इत्यधिकम् ड. 2. नञ् नास्ति ब. 3. विहितस्य नास्ति क. 4. मन्दबुद्धिप्रतिपत्त्यर्थः नास्ति क, मन्दबुद्धेः इ. 5. उदीचाम् इति वर्तते इत्यधिकम् ह. 6. नञ्पूर्वात् अनञ्पूर्वात् इत्यधिकम् ह. 7. अल्पाख्या इत्यधिकम् क. 8. वा ह्रस्वत्वं क. 9. विधिना नास्ति इ. 10. अखट्विका, अखट्वका इत्यधिकम् इ. 11. मतेन इत्यधिकम् क. 12. खट्वाका इत्वापवादो योगः। न कपा इति ह्रस्वापवादश्च। मालाका वीणाका इत्यधिकम् इ. 13. आचार्यग्रहणं विकल्पार्थम् इत्यधिकम् ह.